Pages, 2. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 13612.

Complete.

Same work as that described under No. 13654.

No. 14031. ग्रहनिघण्टुः.

GRAHANIGHAṆṬUḤ.

Pages, 2. Lines, 3 on a page.

Begins on fol. 2*a* of the MS. described under No. 13858.

Complete.

Same work as the above.

No. 14032. ग्रहभाष्यम्, आन्ध्रटीकासहितम्.

GRAHABHĀSYAM WITH TELUGU MEANING.

Pages, 7. Lines, 21 on a page.

Begins on fol. 10*b* of the MS. described under No. 13822.

Contains the eighth Adhyāya only.

Similar to the work described under No. 13416. The portion contained here deals with divination (Praśna).

Beginning :

वन्देऽहं स(र्व)गीर्वाणवल्लभं परमेश्वरम् ।
अनादिनाथसर्वेशपुराणपुरुषोत्तमम् ॥
प्रश्नशास्त्रं प्रवक्ष्यामि सर्वेशानहितोपमम् ।
षोडशस्थ(च)कला(भागं)चन्द्राणां मध्य गोप्यते ? ॥
ग्रहभाष्यप्रमाणेन स्कन्दाचार्यमनोदितम् ।
समस्तफलदं रम्यं महाशास्त्रनिदर्शनम् ॥
कलानां षोडशं भागं सुधा नाम सुमूर्तिकम् ।

* * * *

जीवनिर्जीविकाधातुमूलप्रश्नानुचिन्तनम् ॥
भोजनं व्यवहारं च वर्षावर्षं च चिन्तनम् ।
एतत्सर्वफलारम्भं लाभालाभनिदर्शनम् ॥

End :

कर्कट्यो हिमकण्ठां च राशीनां विधुनायकाः ।
तद्राशीशो गौरवर्णो रामवर्णनिरूपणम् ॥

Colophon:

इदं वा श्रीग्रहभाष्यं महाशास्त्रे सकलप्रश्नग्रहचारयोगे षोडशचन्द्रयोगे महागोप्यमष्टमोऽध्यायः ॥

No. 14033. चन्द्रार्किसूत्रम्.

CANDRĀRKISŪTRAM.

Substance, paper. Size, 13 × 6¾ inches. Pages, 38. Lines, 11 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete.

An astronomical treatise, with tables of calculation, for finding out from the positions of the sun and the moon the required details for the

determination of Tithi, Vāra, Nakṣatra, Karaṇa, Yōga, Tridinaspṛk, Avamā, etc. The work is said to have been composed by Mōṭa Dinakara of Kauśikagōtra and an inhabitant of Jña-vāra village (Budwarpet, Poona ?).

Beginning :

सूर्यं चन्द्रं सद्गुरुं भक्तिपूर्वं नत्वा वक्ष्ये सूर्यचन्द्रोद्भवं च ।
पत्रं पञ्चाङ्गाभिधं बुद्धिमद्भिः ग्राह्यं तज्ज्ञैर्युक्तिमेतन्मयोक्तम् ॥ १ ॥

चन्द्रो १, पक्षा १५, कमयो ३१, ऽत्यष्टि १७, त्यष्टि १७, रुद्रा ११, रामा ३, रामबाणा ५३, श्रिदस्रा २२ । शैला ८, आब्ध्य ४०, आग्नि ३०. वेदाब्धयश्च ४४, वर्षेशादेस्युर्गणा ब्रह्मपक्षे ॥ २ ॥

मही १, कृताक्षीण २४, नगेषव(श्च) ५७, सूर्या १२, खराम ३० श्च समेश्वरस्य । क्षेपो द्विदस्रा २२, नवचन्द्र १९, तुल्या कृताग्नयो ३४ दि १०, गगनं ०, च शुद्धे ॥ ३ ॥

एकाधिका विंशति २१ दस्रबाणा ५२ नृपा १६ शराक्षा ५५ गगनं ० च केन्द्रे ॥

. . . विहीने गगनाग्रधस्र १५०० निघ्नो गुणैः क्षेपयुतो ध्रुवस्स्यात् ॥
व . . . सप्तभिः ७ शेषे शुद्धिकेन्द्रे च त्रिंशतः ३० ।
अर्क १२ घ्नः शुद्धिकेन्द्रे च लवाद्यैः चन्द्रकेन्द्रके ॥
स्वदेशान्तरयोजनैश्च चतुर्थांशेन वर्जितैः ।
वर्षेशस्य विनाडीषु स्वमृणं पूर्वपश्चिमे ॥

तस्य नाड्या गतिर्निघ्ना तरणेर्निजकोष्ठजा ।
षष्ठ्या ६० लब्धं फलं सूर्ये ऋणं सूर्योदये रविः ॥

* * * *

गत्या विभक्ते स्वरसाद्धि किंचित्संमार्जनीयं स्वरसाधिकं तत् ।
लोपो यदि स्याद्गणिते प्यलभ्यस्तस्मात् प्रवक्ष्ये गणितानुसारात् ।
खनेत्रशैलाकलिकास्तिथेश्च खपूर्णनाग ८०० श्च युताः क्रमेण ।
लोपस्य सिद्ध्यै विभजेत् स्वगत्यावमं दिनं तत् कथितं ग्रहज्ञैः ॥

* * * *

वारेशाख्ये वसन् ग्रामे चक्रे दिनकरो मुदा ।
जात(ः) कौसि(शि)कसे(स) गोत्रे मोटज्ञातिसमुद्भवः ॥

Colophon :

इति चन्द्रार्कीसूत्रं संपूर्णम् ॥

गतेष्टनाडीगुणिते खखाष्टौ ८०० सर्वर्क्षनाडीविहृतं कलाद्यम् ।
मुक्तर्क्षयुक्तं सकलाः खगाः स्युः षष्ट्या ६० हृते भ्रष्टशतेषु भुक्तिः ॥

नवाद्रीन्दुरामै ३१७९र्युतः शाककालः कलिर्यातवर्षाब्धिवेदाम्बरामैः ३०४४ ।
विहीनो भवेद्विक्रमादित्यकालः शरामीन्दु १३५हीनाः शकः शालिवाहः ।
इति कलिगताब्दसंवत्सराः शकश्च ।

End:

31	32	33	34	35	36	37	38	39	40	41	42	43	44	45
9	2	2	2	2	2	8	8	8	8	9	9	9	9	9
58	1	14	28	41	54	2	20	33	41	0	13	26	39	52
28	39	49	0	10	21	32	42	53	3	14	24	35	46	56
6	6	2	2	2	2	8	8	8	8	8	9	9	9	9
45	58	11	24	37	50	3	16	29	42	55	8	21	34	47
1	5	8	13	16	20	25	28	32	6	40	43	48	52	55

46	47	48	49	50	51	52	53	54	55	56	57	58	59	60	
10	10	10	10	10	11	11	11	11	12	12	12	12	12	13	अं.
6	19	32	45	58	12	25	38	51	4	17	31	44	57	10	क.
7	17	28	39	49	0	10	21	31	42	53	3	14	24	25	वि.
10	10	10	10	10	11	11	11	11	11	12	12	12	12	13	अं.
1	14	27	40	53	6	19	32	45	58	11	24	37	50	3	क.
0	3	7	12	15	10	22	27	30	38	34	42	46	50	54	वि.

Colophon:

इति घटीफलानि(लं) संपूर्णम् ॥

No. 14034. ज्यौतिषदर्पणम्.
JYAUTIṢADARPAṆAM.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 269. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 16th Adhyāya.

A work in horoscopy by Kañcam Yallayārya, son of Nārayārya and Vīramāmbā. The topics dealt with herein are evident from the headings of the Adhyāyas given below:—

१. संज्ञावत्ताराध्याय.
२. वर्षर्तुमासनिर्णयाध्याय.
३. तिथ्यादिपञ्चाङ्गनिर्णयाध्याय.
४. राजादिनिर्णयाध्याय.
५. संवत्सरराजादिफलाध्याय.
६. ग्रहचारग्रहणभूगोलग्रहयुद्ध-समागमाध्याय.
७. त्रिविधोत्पातलक्षणम्.
८. कालशुद्धिनिरूपणाध्याय.
९. दोषनिरूपणाध्याय.
१०. सङ्क्रान्तिलक्षणाध्याय.
११. गोचारादिबलनिर्णयाध्याय.
१२. प्रथमार्तवाध्याय.
१३. पुंसवनाध्याय.
१४. सीमन्ताध्याय.
१५. बालकृत्याध्याय.
१६. उपनयनक्रमः.
१७. विद्याभ्यासः.
१८. विवाह.
१९. वास्तुलक्षण.
२०. गृहस्थधर्माः
२१. देवतास्थापनादि.
२२. यात्रा.
२३. पैतृककर्म.
२४. मिश्राध्याय.

Beginning:

श्रियःपतिमुमाकान्तं भानुं वाणीं विनायकम् ।
नत्वा ग्रहानृषीन्सर्वान् ज्योतिश्शास्त्रप्रवर्तकान् ॥
कंचयल्लपपचे कमलसुतहितारातिसिद्धान्तवेत्ता
वीरिपं(?) चञ्चरीको नरगिरिनृहरे(:) पादपङ्केरुहस्य ।
आकाङ्क्षि प्रार्चयेति(?) दधति मुकुरवद्यस्य पञ्चाङ्गमेकं
सोऽयं श्रीवीरमाम्बाजलधिसुरतरुर्नारयार्यस्य सूनुः ॥
नंकंचमेल्लयसुधीः कण्वशाखिसभाभ्यन्तरे परम्(?) ।
आविधि किंनगोपुरे कोण्डपल्लि पुरे पुरे(?) ॥
सोऽहं करोमि बोधार्थं सम्यग्ज्यौतिषदर्पणम् ।
ज्योतिश्शास्त्रस्य सारं तदुज्ज्वलं रविबिम्बवत् ॥

मणिवन्निर्मलं शश्वत् स्वच्छं दा(त)द्विधुबिम्बवत् ।
हस्तामलकवन्नित्यमस्तु दैवविदां मुदे ॥
तत्रादौ शास्त्रसंज्ञाय वर्षमासर्तुनिर्णयः ।
तिथिवारर्क्षयोगादि पञ्चाङ्गविनिरूपणम् ॥
राजादिनिर्णयं चैव संवत्सरफलं ततः ।
ग्रहचारश्च तदनु त्रिविधोत्पातलक्षणम् ॥
कालशुद्धिर्महादोषलक्ष्म सङ्क्रान्तिनिर्णयः ।
गोचाराख्यं बलं सम्यक् प्रथमार्तवलक्षणम् ॥
आधानपुंसि सीमन्तकर्मजातकलक्षणम् ।
नामादि बालकृत्यं च तथोपनयनक्रमः ॥
विद्याभ्यासो विवाहश्च वास्तुलक्षणमुत्तमम् ।
गृहस्थधर्मान् सर्वांश्च देवतास्थापनादिकम् ॥
यात्रा च पैतृकं कर्म मिश्रकाध्याय एव च ।
यथाक्रमेण लिख्यन्ते शास्त्राणि सुसमीक्ष्य च ॥
ज्योतिश्शास्त्रं करोमीति न मे गर्वो विचार्यताम् ।
यत्र सञ्चरते भानुः खद्योतस्तत्र पुष्करे ॥
शोधयन्तु प्रबन्धे मे गुणदोषौ विपश्चितः ।
हंसानामधिकारो हि क्षीरनीरविवेचने ॥
प्रभवो विभवः शुक्लः प्रमोदूतः प्रजापतिः ।

* * * *

Colophon:

इति ज्यौतिषदर्पणे संज्ञावतारः प्रथमः ॥

End:

Colophon:

इति कर्बयल्लयविरचिते ज्यौतिषदर्पणे बालकृत्यं नाम चतुर्द(पञ्चद)शो-ध्यायः ॥

चन्द्रस्य राशि षट्त्रिंशद्भागान् कृत्वा फलं वदेत् ;
शिरोरोगं महाप्रीतिर्दैवकार्यं सुखासनम् ॥
नेत्ररोगं च सत्कर्म नारीक्रीडा महाज्वरम् ।
सुवर्णं भूषणं वस्त्रं विषमुक्तं च मैथुनम् ॥

* * * *

प्राजापत्यमखेन्द्राग्निश्रवणं च चतुष्टयम् ।
भगार्यमैन्द्रमित्रे च वसुवारणचार्द्रभम् ॥
एतत्ताराष्टकं चैव इन्दुभ्यामिव वीक्षते ।

No. 14035. ज्यौतिषदर्पणम्.
JYAUTIṢADARPAṆAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 103*a* of the MS. described under No. 13106

Contains the seventh Adhyāya without the beginning.

Same work as the above.

No. 14036. ज्यौतिषदर्पणम्.
JYAUTIṢADARPAṆAM.

Pages, 31. Lines, 7 on a page.

Begins on fol. 167*a* of the MS. described under No. 13490

Contains the Vāstuprakaraṇa only.

Same MS. as that described under No. 42 on pages 89, 248, and 249 of M. Sēshagiri Śāstri's Report No. 2.

No. 14037. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 13859.

Incomplete, with Telugu notes.

Gives the astrologically proper time for the performance of certain ceremonies, for taking oil bath, etc.

Beginning:

मृगशिरास्वातिवैशाखे ज्येष्ठे चैव चतुर्दश ।
कृत्तिकामघरेवत्यां पुनर्वसूदशत्रिकम् ।
उत्तराषाढा च विंशतिः ।
आर्द्राहस्तनक्षत्रमेकविंशतिनाडिका
भरणी चोत्तराभाद्रा पूर्वाषाढ त्रियष्टकम् ।

End:

तैलाभ्यङ्गविधिं हि चैव मुनयः शसान्ति मन्देन्दुवि
द्वारे पर्वचतुर्दशीं प्रतिपदं षष्ठ्यष्टमीं द्वादशीम् ।

ज्येष्ठामुत्तरफल्गुनीञ्परिहरौ जन्मत्रयं सङ्क्रमं
हित्वा बालकवृद्धरोगयुषु यात्राकालं न दोषावहम् ॥

No. 14038. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 1a of the MS. described under No. 13661.

Deals with certain minor astrological matters usually found in a Hindu calendar.

Beginning:

ज्येष्ठमासे सिते पक्षे आर्द्रायां दशवृक्षके ।
सजला निर्जला मेघाः निर्जलं सजलं तथा ॥

चित्रास्वातिविशाखायां श्रवणे नातिवर्षति ।
सर्वरत्नं परित्यजेद्रत्नवद्धान्यसङ्ग्रहम् ॥

End:

इन्दौ शरगिरीद्वस्तौ मन्दो वा भूमिनन्दनः ।
आयुर्वा परुषं वा भूलोकं भीकरं भयम् ॥

No. 14039. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 13921.

Incomplete.

On the different Yōgas which are due to conjunctions of particular Vara and Nakṣatra and on good or evil arising from making certain undertakings on such occasions, etc.

Beginning:

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्य(वा)ट्
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चाननः ।

विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवः
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु माम् ॥

* * * *

जन्मसम्पद्विपत्क्षेमप्रत्यक्साधननैधनम् ।
मैत्रं परममैत्रं च जन्मादीनां पुनः पुनः ॥
अशुभं जन्मतारा स्यात् सम्पत्तारा धनप्रदा ।
विपत्तारा विपत्तिं च क्षेमता(रा ?) क्षेमकारका ॥
प्रत्यरं वैरि सम्प्रोक्तं साधनं कार्यसाधनम् ।

End:

भानूत्तराषड्वितीये च द्वितीये चति उत्तरे ।
हस्ता मूला च सप्तम्यां तृष्यस्थातिप्रयाद . . (?) ॥
अमायां पञ्चमीयुक्ता अष्टमी रोहिणी तथा ।
इति जालमुखश्चेति सर्वकर्म विवर्जयेत् ॥

No. 14040. ज्यौतिषविषयः, आन्ध्रटीकासहितः.
JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 25. Lines, 4 on a page.

Begins on fol. 31*b* of the MS. described under No. 13661.

Similar to the work described under No. 13558 but with Telugu meaning.

Beginning:

अग्निबाणपुरारन्ध्रवसुरत्नगजाः पुरा ।
आदित्यादिग्रहास्सर्वे नित्यग्रहफलं लभेत् ॥

* * * *

अध्वानं रविवासरे हिमकरे सम्भोगमैश्वर्यबा-
भीतिर्भूमिसुते प्रियं शशिसुते जीवे चम(तथा)र्थागमम् ।
सौभाग्यं भृगुवासरे च लभते मन्दे महारोगतां
जन्मर्क्षे रविवासरादिषु युतं शंसन्ति गार्ग्यादयः ॥

End:

नक्षत्रं गर्भिणिनामधेयं तिथिं च ऋक्षं मुनिसंयुतं च ।
वारेण युक्तं नवभागशेषं समे(च)कन्या विषमे कुमारः ॥

No. 14041. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 123. Lines, 5 on a page.

Begins on fol. 23b of the MS. described under No. 12562.
Incomplete.

Deals with horoscopy. Gives the nature of the good or evil befalling to a person from planetary influences.

Beginning:

केन्द्रे श्रीभाग्यहानिस्स्यात् शुभो यदि न जातके ।
विवाहे वा प्रयाणे वा न तत्राहुः शुभं बुधाः ॥
स्वाधिमित्रोच्चराशिस्थः पापोऽपि शुभमिच्छति ।
शुभोऽप्यशुभदाता स्यादस्तनीचारिराशिगैः ॥
यस्य जन्मनि नीचस्थाः तस्योच्चाधिपतौ विधौ ।
तद्राशिपे वा केन्द्रस्थे भवेत्सार्वविशेश्वरः ॥

End:

देहायासं मनःक्लेशं वित्तनाशं रिपोर्भयम् ।
स्वल्पसौख्यमवाप्नोति राहोरन्तर्गतश्शनिः ॥
अर्थनाशो देहपीडा कलहो बन्धुभिस्सह ।
देशत्यागो निवृत्तिश्च राहोरन्तर्गतश्शनिः ॥

No. 14042. ज्यौतिषविषयः, द्राविडटीकासहितः.
JYAUTIṢAVIṢAYAḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 13 × 1½ inches. Pages, 14. Lines, 6 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Bhagavadārādhanakrama 8a, Gāyatrirāmāyaṇa 12a, Aṣṭākṣaramantranyāsa 16a.

Incomplete.

Similar to the work described under No. 14040. It is accompanied by meaning in Tamil.

Beginning:

न पूर्वे शनिसोमे च न गुरुर्दक्षिणस्तथा ।
न पश्चाद्भानुशुक्रे च नोत्तरे बुधमङ्गले ॥

अङ्गारपूर्वे गमने च लाभं सोमे शनिर्दक्षिणमर्थलाभम्(:) ।
बुधे गुरौ पश्चिमकार्यसिद्धिः रवौ भृगौ चोत्तरधान्यलाभः ॥

End:

हरिहरकरचित्तासौम्यपौष्णोत्तराया-
दितिवसु च धटाली सिंहवर्जे विलग्ने ।
शशिगुरुबुधकाव्या नन्दने पर्वरिक्ता-
रहिततिथिषु . . . . नैधने कर्णवेधः ॥

No 14043. ज्यौतिषविषयः, द्राविडटीकासहितः.

JYAUTIṢAVIṢAYAH WITH TAMIL MEANING.

Pages, 10. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 13600.

Incomplete.

Deals with certain astrological matters, such as the inauspicious period of time in each Nakṣatra, the auspicious days for travelling in particular directions, etc.

Beginning:

आदित्यादिग्रहास्सर्वे सनक्षत्रास्सराशयः ।
कुर्वन्तु मङ्गलं नित्यं यस्तेषां सूर्यशास्त्रयोः ॥

* * * *

नक्षत्रत्याज्यम्—

मृगशिरोस्वातिविशाखे ज्येष्ठे चैव चतुर्दश ।
पुष्यपुब्बा च चित्रा च उत्तराषाढविंशतिः ॥

* * * *

प्रयाणवाराणि—

अङ्गारपूर्वे गमने च लाभः सोमे शनिर्दक्षिणमर्थलाभः ।
बुधे गुरौ पश्चिमकार्यसिद्धिः रवौ भृगौ चोत्तरधान्यलाभः ॥

End:

सूरे सौम्यसितावरी रविसुतो मध्ये परे त्वन्यथा
सौम्यार्कौ सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ।
शुक्रज्ञौ सुहृदौ समस्सुरगुरुर्मन्दस्य चान्येऽरयो
ये प्रोक्तास्सुहृदस्त्रिकोणभवनार्येऽमी मया कीर्तिताः ॥

N. 14044. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 13700.

Deals with the proper time for the performance of various ceremonies such as Upanayana, marriage, consecration of divine images, etc.

Beginning:

माघफाल्गुनवैशाखज्येष्ठमासाश्शुभावहाः ।
मध्यमः कार्तिको मार्गशीर्षको निन्दितः परैः ॥
न मण्डनं मीनचैत्रे मुण्डनं तु विधीयते ।
मण्डनं मुण्डनं कार्यं . . . त्र विधीयते ॥
. . . . मानोरार्द्राप्रवेशनात् ।
विवाहो देवतानां च प्रतिष्ठा चोपनायनम् ॥

End:

चन्द्रादित्यौ शुभांशस्थौ बलाढ्यौ स्वोच्चगौ यथा ।
महादोषसमाख्याता दोषा भङ्गं ययुस्तथा ॥
तत्र दोषापवादविषये वृद्धाचारतो व्यवस्था द्रष्टव्या ॥

Colophon:

इति महादोषभङ्गं समाप्तम् ॥

No. 14045. ज्यौतिषविषयः, सटीकः.
JYAUTIṢAVIṢAYAḤ WITH MEANING.

Pages, 37. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 13932.

Wants the beginning.

Similar to the work described under No. 14041.

Beginning:

पुत्रस्थाने बुधक्षेत्रे मन्दक्षेत्रेऽथवा पुनः ।
मन्दमान्दियुते दृष्टे तदा दत्तादयस्सुताः ॥

अन्यबीजम्—

न लग्नमिन्दुं च गुरुर्निरीक्षते न वा शशाङ्को रविणा समागतः ।
स पापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयम् ॥

अस्यार्थः—लग्नचन्द्रलग्नयोः गुरुदृष्टिहीनश्चेत् अन्यबीजम् ।

End:

अथ ग्रहाणां भावस्फुटमुच्यते—

ग्रहस्फुटं विनिक्षिप्य भावस्फुटमुदक्षिते ।
यस्मिन् भावे गताः खेटा दिशेयुस्तत्फलानि वै ॥
भावचक्रवशादेव फलं दद्युः ग्रहास्स्मृताः ।

No. **14046**. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 109*a* of the MS. described under No. 13912.

Incomplete.

On the prediction of the fortunes of persons by a reference to the position of the planets at the time of the birth, etc.

Beginning:

कुजस्य सप्त वर्षाणि भृगोष्षोडश वत्सराः ।
बुधस्य नव वर्षाणि शीतरश्मेस्त्रिसप्तकम् ॥
आदित्ये पञ्चकं विद्यात् दश चैव गुरोरपि ।
सौरेश्चत्वारि वर्षाणि कालचक्रे विधीयते ॥
कालचक्रं प्रवक्ष्यामि संक्षिप्तं शृणु तत्त्वतः ।
शुभाशुभं मनुष्याणां हितमव्यसुनिश्चितम् ॥
लग्ने वा चन्द्रलग्ने वा प्रश्नलग्ने तथैव च ।
तद्दिनं नवपर्युक्तमायुष्यं परिकीर्तितम् ॥

End:

मेषे जीव इति स्मृतः कर्किदशा—௵ 2, ௴ 5, நாள் 1.
सिंहदशा—௴ 9 நாள் 9.
कन्निदशा—௵ 1, நாள் 15.
तुलादशा—௵ 1, ௴ 10, நாள் 10.

No. **14047**. ताजकम्, सव्याख्यानम्.
TĀJAKAM WITH COMMENTARY.

Substance, paper. Size, 7¾ × 4½ inches. Pages, 114. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Same work as that described under No. 3045 of the India Office Library Catalogue. By Nīlakaṇṭha, son of Ananta. The commentator's name is not given.

The transcription of the MS. is said to have been commenced on Friday, the fifth of the dark fortnight of the Kārttikai month in the year Vibhava.

Beginning:

सटीका(क)सोदाहरणताजकम् ।

तदादौ प्रारभ्यमाणस्य ताजकनामकस्यास्य होराग्रन्थस्य निर्विघ्नपरिसमाप्तिं चिकीर्षुरादौ नमस्क्रियारूपं मङ्गलमाचरति दैवज्ञः—

प्रणम्य हेरम्बमथो दिवाकरं गुरोरनन्तस्य तथा पदाम्बुजम् ।
श्रीनीलकण्ठो विविनक्ति सूक्तिभिः तत्ताजकं सूरिमनःप्रसादकृत् ॥

श्रीनीलकण्ठः तत्पूर्वाचार्योक्तं ताजकं सूक्तिभिः सुयुक्तिभिः नानाच्छन्दोभिर्वा विविनक्ति प्रकटीकरोति । कथं भूतम्? सूरिमनःप्रसादकृत् सूरयः पण्डिताः तेषां मनः अन्तःकरणम्; तस्य प्रसादकृत्; एतद्ग्रन्थावलोकनेन पण्डितमनः प्रसन्नं भवतीत्यर्थः। किं कृत्वा? हेरम्बं गणपतिं प्रणम्य। पुनः किं कृत्वा? दिवाकरं सूर्यं प्रणम्य, पुनः किं कृत्वा? अनन्तदैवज्ञपदाम्बुजं प्रणम्य ।

अथ द्वादशराशिस्वरूपानाह—तत्रादौ मेषस्य यथा ।

पुमांश्चरोऽग्निस्सदृशश्चतुष्पात् रक्तोष्णपित्तोऽतिरवो द्विरूपः ।
पीतो दिनं प्राग्विषमोदयोऽल्पसङ्गमजो क्षत्रनृपस्समोजः ॥

पुमान् पुरुषराशिः । चरः, चरसंज्ञकः, अग्निः, अग्निराशि ।

End:

हीनांशसाम्ये बलिनो दशाद्या बलस्य साम्येऽल्पगतेऽस्तपूर्वा ।
साम्ये विलग्नास्य खगेन चिन्त्या बलाधिका लग्नमतेर्विचिन्त्या ॥

द्वयोरंशैस्साम्ये समत्वे सति बलिनः पञ्चवर्गा बलाधिकस्य आदौ प्रथमा दशा स्यात् । अत्र शुद्धांशसाम्ये इत्यपरः पाठः । . . . . . तदा दशाप्रवेशः शुद्धः ।

अन्यथाशुद्धाः । उदाहरति, प्रस्तुतजातके शनिः.

No. **14048.** ताजकसारः.

TĀJAKASĀRAḤ.

Pages, 44. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 6742.

Breaks off in the fifth Adhyāya.

Tājaka is said to be the name given to Persian treatises in astrology dealing generally with the predictions relating to the year, month, etc., with divination, etc. The work under notice purports to be a summary of treatises. They are usually divided into three parts, viz., Saṁjñātantra, Varṣatantra and Praśnatantra

Beginning:

सप्तविंशतिऋक्षाणि ग्रहास्सूर्यादया(यो)नव ।
अष्टोत्तरशतांशास्ते राशयो द्वादशैव हि ॥
तेषां भेदविकल्पेन सर्वेषाञ्च पृथक् पृथक् ।
प्रश्नतो जन्मसमयाद्वर्षचर्यानुरोधतः ॥
राशिस्वरूपं प्रथमं त्रैराशिकपति(विधि)स्ततः ।
सख्यानि कार्यरूपाणि ग्रहाणां धातुवर्गजम् ॥
ग्रहदृष्टिप्रभेदश्च पञ्चधा कथितं स्फुटम् ।

षोडात्र ।

दीप्तिभागश्च रव्यादेः भ्रमणं खचरस्य तु ॥
योगं षोडशकञ्चैव हर्षस्थानानि यान्यपि ।
वसुवारिधिसस्थानि सहमानेव तान्यपि ॥
तथैव पञ्चवर्गेशान् ग्रहाणां बलचिन्तनम् ।
एतत्सामान्यतः प्रोक्तं बहुधा तद्विकल्पनम् ॥
राशिस्वरूपं मेषाद्य स्त्रियाद्याश्चरादयः ।
चरस्थिरोभयाख्यस्तु क्रूरसौम्यक्रमेण च ॥
चापापरार्धं मेषोक्षमृगसिंहाश्चतुष्पदाः ।
बहुपादौ कुलीराली घटः पाद(वि)वर्जितौ ॥

End:

श्रीवेङ्कटेशकृपया वेङ्कटेश्वरशर्मणा ।
योगानां लक्षणाध्यायः चतुर्थोऽयं प्रकाशितः ॥

Colophon:

इति ताजि(ज)कसारे चतुर्थोऽध्यायः ।

वर्षादौ जनने वापि सहमाननिरीक्ष्य च ।
वसुवारिधिसस्थानि फलमूह्य विशेषतः ।

वर्षाधिपो विलग्नेशस्तत्रस्थो यदि वत्सरे ।
आत्मसौख्यं मनोल्लासं दारपुत्रार्थसम्पदः ॥

* * * *

शुभदृष्ट्या फलं सौम्यं पापदृष्ट्या तथा फलम् ।
वर्षाधिपे सति भृगौ शुभयुक्ते क्षितौ यदि ॥
दुर्बलो राजदण्डस्स्यात् . . . . ।

No. 14049. द्वित्रिग्रहयोगाध्यायः.
DVITRIGRAHAYŌGĀDHYĀYAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 31a of the MS. described under No. 12524.

Incomplete.

This Adhyāya seems to be a portion of a treatise on horoscopy and deals with the characteristics and fortunes, etc., of persons in whose horoscopes two or more planets coexist in one house or Rāśi, etc

Beginning:

तिग्मांशुर्जनयत्यथेन्दुसहितो यत्रान्धकारं नरं
भौमेनाल्पतरं बुधेन निपुणं धीकीर्तिसौख्यान्वितम् ।
क्रूरं वाक्पतिनान्यकार्यनिरतं शुक्रेण रङ्गायुधैः
लब्धस्वं रविजेन धातुकुशलं भाण्डप्रकारेषु वा ॥
इन्दुसहितः तिग्मांशुः यत्रान्धकारं जनयति ।

* * * *

व्रीडामन्थरचारुवीक्षणगतिः स्रस्तांसबाहुस्सुखी
श्लक्ष्णस्त्यागरतः फलीसुनिपुणः शास्त्रार्थविद्याधिकः ।
मेधावी सुरतप्रियोऽपरगृहैर्वित्तैश्च संपूज्यते
कन्यायां परदेशकः प्रियवचः कन्याप्रजोऽल्पात्मजः ॥

End:

अथैकेन श्लोकेन कुम्भलग्नस्य दोषं दर्शयति—

न कुम्भलग्नं शुभमाह सत्यो न भागभेदान् यवना वदन्ति ।
कस्यांशभेदो न यथा स्थिराशे रतिप्रसन्नस्स्थितिविष्णुगुप्तः ॥

No. 14050. नक्षत्रजात्यादिनिर्णयः.
NAKṢATRAJĀTYĀDINIRṆAYAḤ.

Page, 1. Lines, 3 on a page.

Begins on fol. 1b of the MS. described under No. 13859.

Wants the beginning and the end.

Gives certain particulars in relation to each of the 27 Nakṣatras

Beginning and **End**:

. . . . भरणीरेवती गजौ ।
पुष्यश्च कृत्तिकाच्छागौ रोहिणीन्दुभुजङ्गमाः ॥
आश्लेषादितिमार्जालौ स्वाती हस्ता च माहिषौ ।
विशाखाचित्रभे व्याघ्रौ . . . . . . ॥
गोव्याघ्रं गजसिंहमश्वमहिषं चैणं च वभ्रूरगं
वैरं वानरमेषकं च कुमहत्तद्वद्विडालोडुकम् ।
लोकानां व्यवहारतोऽप्यपि तथा ज्ञात्वा प्रयत्नादिदं
दम्पत्योर्नृपभृत्ययोरपि सदा वर्ज्यं शुभस्यार्थिभिः ॥

No. **14051.** नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Pages, 3. **Lines**, 6 on a page.

Begins on fol. 3*b* of the MS. described under No. 13630.

Complete.

Same work as that described under No. 13797 *ante*.

No **14052.** नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Page, 1. **Lines**, 6 on a page.

Begins on fol. 93*a* of the MS. described under No. 13609.

Complete.

Same work as the above.

No. **14053.** पञ्चाङ्गवाक्यम्.

PAÑCĀṄGAVĀKYAM.

Pages, 6. **Lines**, 8 on a page.

Begins on fol. 42*b* of the MS. described under No. 13502.

Complete.

Same work as that described under No. 13449 *ante*.

Colophon:

इदं पञ्चाङ्गगणितं सम्पूर्णम् ॥

No. 14054. पञ्चाङ्गवाक्यम्.
PAÑCĀṄGAVĀKYAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 25a of the MS. described under No. 13605.

Incomplete.

Same work as the above

No. 14055. पञ्चाङ्गम् (भार्गवीयम्).
PAÑCĀṄGAM (BHĀRGAVĪYAM).

Pages, 2. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 13792.

Wants the beginning ; otherwise complete.

Gives some details for the preparation of a Hindu calendar evidently based upon Vararuci's mnemonic aphorisms. It is also called Bhārgavīya.

Beginning:

. . . . त्तरापाढे सस्यार्थं कर्म नश्यति। श्रवणे कर्म रोगिणांमृतिस्स्यात्। धनिष्ठायां सेनार्थकर्मणि कृते सेनापतित्वं भवति। शतभिषगुयोगे कृते नाशस्स्यात्। पूर्वप्रोष्ठपदे . . . . . । उत्तरप्रोष्ठपदे कलहकर्म(णि)कृते तदुपशमनं स्यात्।

End:

सन्ध्यायां त . . . कादिकर्मणि कृते कार्यसिद्धिस्स्यात्। एवं सप्तवारेषु परस्परनाडिका . . प्रत्येकं प्रत्येकं यथोक्तं फलानि योज्यानि।

इत्येवं भार्गवं नाम पञ्चाङ्गं भार्गवंचो(वो)दितम्।
विदित्वा मनुजो यस्तु कुरुते कार्यमव(न्व)हम्॥
घटिका चापरिज्ञाणि न धीमान्नच पण्डितः।
समजो वेदवित्॥

Colophon:

इति वररुचिविरचितं भार्गवप्रणीतं पञ्चाङ्गं समाप्तम्॥

No. 14056. पादच्छायाहोरात्रकालनिर्णयः.
PĀDACCHĀYĀHORĀTRAKĀLANIRṆAYAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 13630.

Incomplete.

On the method of ascertaining the exact time, in the day by means of certain calculations based upon the measurement of a person's shadow

by his footsteps, and in the night by the observation of the position of certain heavenly bodies.

Beginning :

नवत्यष्टपदादेका नाडिका तत्र उच्यते ।
पञ्चार्धचत्वारिंशद्द्वे अष्टाविंशत्रयस्तथा ॥
एकोनविंशच्चत्वारि चतुर्दश्यां तु पञ्चमम् ।
दशार्धं नाडिका षष्ठी अष्टमे सप्तनाडिका ॥

* * *

गिरिपुटनटकारी लिङ्गरूपः कनीयान्
कटिबलवशमाता सासिजालान् ददाति ।
सितशशुभगमेतच्चैत्रमेषादिभानोः
दिवसगणनयार्धं छायया काचिमध्ये ॥

End :

स्वाती मकरे कामा विशाखा मकरे वनम् ।
अनूराधे कुम्भे नाभि ज्येष्टं कुम्भे कथा ॥
मूलं कुम्भे गच्छा पूर्वाषाढा मीने कवी ।
उत्तराषाढा मीने गाथा । नक्षत्रसंख्या—
गङ्गान्तं मल्लिकामाला चामरैरावकिङ्कणैः ।
लिङ्गान्ते लाभगावेगा रीरुटे तारवेधिका ॥

No. 14057. प्रतिप्रयाणविषयः आन्ध्रटीकासहितः.

PRATIPRAYĀṆAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 8. Lines, 19 on a page.

Begins on fol. 22*a* of the MS. described under No. 5764.

Determines what days are astrologically auspicious for undertaking journeys and what days are inauspicious for such purposes, etc.

Beginning :

नत्वा गणेशवाण्यौ प्रवेशकालप्रवेशकां(शिनां)नृणाम् ।
दक्षाय विष्णुनोक्तं हिताय विदुषां समासतः ॥

* * * *

जिगमिषुरभ्यर्च्यादौ दिक्पतिमभिवन्द्य शिष्टगुरुबन्धून् ।
. . . . त्सादायदध्यक्षतनूक्षमावाहानिजलः (?) ॥

* * * *

चन्द्रस्वरे शुभं देवि दिग्ग्रहकार्यं रवेर्नाड्याम् ।
निक्षिप्तलदयं यात् प्रवेशश्च तत्र बुधः ॥

* * * *

छिद्रं रिक्ता पर्व वैधृतिपातौ विहाय कुजमन्दौ ।
योषिद्याने शुक्रचन्द्रानुकूले प्रयातव्यम् ॥

* * * *

प्रयाणं चरभे श्रेष्ठं द्विस्वभावे तु मध्यमम् ।
जघन्यं स्थिरभे नित्यं विहायाष्टान्त्यजन्मभम् ॥

End :

मेषादिरविभुक्तांशान् गतान् रविस्थिते ततः ॥
मीनतानुरानु मास(?)न्ता . . . थेहानाक्रमः ।
यानोदयांशराशिभैरवाचै गागमभेद्भूयः(?) ॥

No. 14058. प्रतिप्रयाणादिविषयः.
PRATIPRAYĀṆĀDIVIṢAYAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 67*a* of the MS. described under No. 13699.
Similar to the above.

Beginning :

अथ प्रतिप्रयाणमाह—

यात्रालग्नगताब्द एव रविजे सूर्ये तदर्धे दिने
शीतांशौ त्रिदिनं कुजे शशिसुते मासद्वयं वाक्पतौ ।
मासं दैत्यगुरौ च पक्षमथवा दृष्टे विलग्ने ग्रहैः
सञ्चार्यां परतः समेष्यति पुनः स्वस्थान . . वान् ॥

अत्रैव विशेषमाह—

मन्दादिग्रहकालएव विदितो यात्रा विलग्ने क्रमा-
देकद्वित्रिगुणाश्चरे स्थिरग्रहे स्याद्द्विस्वभावाभिधे ।
यात्रालग्नपरादिभागसहितेष्वर्कादिखेटेषु वा
स्यादेवं प्रतियानमुक्तगमनं निश्चित्य य(त्नात्) वदेत् ॥

End :

सकलदेवताप्रतिष्ठाकालमाह—

वारे श्वेतकविज्ञजीवशशिनां श्रोणत्रये चोत्तरा-
मैत्रादित्यकरद्वयान्त्यशशभृद्दस्रप्रजेशोडुषु ।

भद्रापूर्णजयासु चोदगयने शुक्रेज्ययोर्व्यक्तचा
कुर्यात्कामदिकं(तिथिं) विहाय च कुहूं देवप्रतिष्ठा शुभम् ॥

No. **14059.** प्रश्नलक्षणम्.
PRAŚNALAKṢAṆAM.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 3. Lines, 5 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 2*a*. The other works herein are Svapnadhyāya 1*a*. Jyautiṣaviṣayaḥ 3*a*.

Incomplete.

Similar to the work described under R. No. 472 of the Triennial Catalogue of MSS., Vol. I, Part I-B.

Beginning :

सरस्वति महादेवि त्रिषु लोके॒ पूजिता ।
नामरूपे भगवति नमो देवि सरस्वति ॥
मेषे द्विपादचिन्ता च वृषभे च चतुष्पदः ।
मिथुने गर्भचिन्ता च कर्कटे व्यावहारिकः ॥

End :

गुणलाभं भृगौ भोगं शनिर्व्याधिसमागमम् ।
राहुणा घातपातं च केतोर्मृत्युर्न संशयः ॥

No. **14060.** प्रश्नविषयः.
PRAŚNAVIṢAYAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 13699.

Incomplete.

Similar to the work described above.

Beginning :

प्रश्नः कालेषु परिधौ प्रष्टा चेद्गर्भमाविशेत ।
नष्टद्रव्यादिलाभश्च पृष्टतो गमनं वदेत् ॥
एकद्वित्रिग्रहैर्युक्ते चन्द्रेण परिवेष्टिते ।
पञ्चमे दिवसे वृष्टिरथ वा त्रीणि पञ्चके ॥

End:

तस्य सेनागमो नास्ति शुभे लग्ने शुभेक्षिते ।
मिश्रे मिश्रफलञ्चैव शास्त्रे ज्ञानप्रदीपके ॥

पञ्च ग्रहा घ्नन्ति समस्तदेशान् षष्ठा ग्रहा घ्नन्ति समस्तभूपान् ।
सप्तग्रहा घ्नन्ति समस्तलोकान् अष्टौ ग्रहा घ्नन्ति समस्तजीवान् ॥

No 14061. प्रश्नशास्त्रम्.
PRAŚNAŚĀSTRAM.

Pages, 4. Lines, 6 on a page.

Begins on *fol.* 25*a* of the MS. described under **No. 13909.**
Incomplete.
Similar to the above.

Beginning:

प्रश्नलग्नाधिपः केन्द्रे कार्यस्थानं गतोऽपि वा ।
भार्गवेन च चन्द्रष्टा (संदृष्टः) कार्यसिद्धिर्न संशयः ॥
प्रश्नलग्नाधिपो लाभे कार्येशे केन्द्रसंस्थिते ।
गुरुणा चैव सन्द्रष्टा (दृष्टः) (कार्यसिद्धिर्न) संशयः ॥

End:

परदारातुरो गुह्ये नाभ्यामल्पसुखं भवेत् ।
उदरे श्रियमाप्नोति हस्तयोस्तस्करो भवेत् ॥
शूरत्वं बाहुमूले तु श्रीपतिः स्कन्धयोर्द्वयोः ।
आसने पण्डितं वी(वि)द्यात्पट्टबद्धं निरस्य च ॥

No. 14062. प्राण्यायुर्लक्षणम्, आन्ध्रटीकासहितम्
PRĀṆYĀYURLAKṢAṆAM WITH TELUGU MEANING.

Pages, 6. Lines, 11 on a page.

Begins on fol. 6*a* of the MS. described under No. 2398.

Complete.

Gives the longest period of existence of ants, mosquitos, bugs, reptiles, fish, certain animals, etc.

Date of transcription: Monday, the 10th day of the dark fortnight of the Jyeṣṭa month in the year Tāraṇa.

Beginning:

पिपीलिकादिजन्तूनामायुःप्रमाणम् ।
पिपीलिकादिब्रह्मान्तानां तत्तन्मानेन आयुर्वर्षशतम् ॥

तदाह:—

पिपीलिकानां पक्षश्च मशकानां तथैव च ।
स्वेदजानां मक्षिकाणां मत्कुणानां द्विपक्षकम् ॥
अण्डजानां बुद्बुदानां शलभानां त्रिमासकम् ।
मधुमक्षिकयोरेवमृतुत्रयमुदाहृतम् ॥
गोधासरटयोर्वर्षं शिथिल्याः कर्कटस्य च ।
क्षुद्राणां चैव मत्स्यानां सर्वेषां जलचारिणाम् ॥

* * * *

गतमनुनामानि—

स्वायंभुवमनुश्चैव स्वारोचिषमनुस्तथा ।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषो गतः ॥

End:

कलौ युगसहस्राणि दिनं ब्रह्म तथा(नि)शि ।
त्रुटिप्रभातवर्षं तु ब्रह्मणोक्तं लिखेत्क्रमात् ॥
त्रुटिप्रभातवर्षं तु मासादिरुच्यतेऽधुना ।
कृताब्दे सङ्कुचनस्यां तु सन्धिप्रोक्तो जलप्लवः ॥

* * * *

Colophon:

इति जन्तुरायुर्मानलक्षणं(नाम)मनुयुगप्रमाणं सम्पूर्णम् ॥

No. 14063. बालबोधः.

BĀLABŌDHAḤ.

Substance, paper. Size, 11⅜ × 4¼ inches. Pages, 22. Lines, 11 on a page. Character, Dēvanāgari. Condition, good. Appearance, new. Complete.

Contains the following subjects:—

नक्षत्रनामाधिदैवतफलानि.	होराचक्र.
योगफल.	देवादिगणाः.
चन्द्राशिचक्र.	गृहारम्भद्वादशमासफलादि.

व्रतबन्ध.	पञ्चार्क.
विद्यारम्भ.	सङ्क्रान्तिसमतत्फल.
वस्त्रपरिधान	सूर्यवक्रादिचार.
स्नाननक्षत्र.	दीनदशाफल.
हवनविधि.	प्रश्न.
शुक्रोदयफल.	

An astrological treatise dealing with the topics mentioned above, by Muñjaditya. It is intended for the use of beginners.

Beginning:

विघ्नेश्वरं नमस्कृत्य देवीं चैव सरस्वतीम् ।
गुरुं च देवतानां च प्रसादादुद्धृतो मया ॥
नानाशास्त्रं समो(मु)द्धृत्य क्रियते बालबोधकम् ।
मुञ्जादित्येन विप्रेण शिष्यार्थं सारसङ्ग्रहः ॥
विदुषा ब्राह्मणानां च गणकानां तथैव च ।
एतेषां करलग्नोऽस्मिन् बालबोधं च विस्तरे ॥
उदयाचलपर्यन्तमस्ताचलमहीमिम(मु) ।
विख्यातो बालबोधोऽयं मुञ्जादित्येन कारयेत् ॥
छन्दोलक्षणसंयुक्तं नक्षत्राणां समुच्चयम् ।
संक्षेपेण परिज्ञानं रत्नकोशस्य मध्यमः ॥
सर्वेषु शुभकार्येषु क्रूरयोगान् परित्यजेत् ।

Colophon:

इति सप्तविंशतियोगाः ॥

परिघार्धं व्यतीपातं वैधृती सकलं त्यजेत् ।
विष्कम्भे घटिकाः पञ्च शूले सप्त प्रकीर्तिताः(?) ॥
षट् गण्डे चातिगण्डे च नव व्याघातवज्रयोः(?)।

इति योगफलम् ॥

अथ चन्द्रमाद्वादशराशिचक्रम्—

End:

अथ समस्तप्रश्नाक्षरीकं रुद्रसे युक्तं सप्तभिर्भागमाहरेत् ।
अस्ति नास्ति मृतं लाभं कल्याणं कीर्तिनाशनम् ।
त्रिपुष्कराणि [च] वक्ष्यामि सद्यः सत्यप्रकारकम् ॥

इति प्रश्नः ॥

उदयाचलपर्यन्तमस्ताचलमहीमिमाम् ।
विख्यातो बालबोधोऽयं मुञ्जादित्येन कारयेत् ॥
पूर्वसागरपर्यन्तं पश्चिमोदधिसंयुतम् ।
हेलया क्रमते नित्यं सनायान्तु दिनेश्वरः ॥ इति ॥

Colophon:

इति बालबोधस्समाप्तः ॥

No. 14064. बृहज्जातकव्याख्या—दशाध्यायी.

BṚHAJJĀTAKAVYĀKHYĀ : DAŚĀDHYĀYĪ.

Substance, paper. Size, 13¾ × 8¾ inches. Pages, 359. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new. Complete.

A commentary on the first ten Adhyāyas of Varāhamihira's Bṛhajjātaka or Horāśāstra which has been described under No. 13832 *ante* is added to the text. The commentator's name is not known.

Beginning:

ज्योतिश्शास्त्रमिदं विधाय विपुलं त्रिस्कन्धमिन्नं पुरा
लोकानां मतिमान्द्यतः कलियुगे तत्पादभीत्या पुनः ।
स्वल्पं तत्सकलं ततो रचितवानादित्यदासात्मजः
भूत्वा यो मिहिरो वराहमिहिरं नाम्ना नमस्कुर्महे ॥
वराहहोराशास्त्रस्य विज्ञातोऽर्थोऽत्र यो मया ।
स तु शिष्यावबोधार्थं सङ्क्षेपेण विलिख्यते ॥

मूर्तित्व इति । अनेन श्लोकेन वराहमिहिराचार्यः शास्त्रं चिकीर्षुः स्वेष्टदेवतायाः स्वाभिप्रेतं वरं प्रार्थयते रविर्नो वाचं ददात्विति । अर्थबहुलं शास्त्रत्वं प्रारभ इति तदुत्तरप्रतिज्ञां सफलीकर्तुमियं प्रार्थना । विवक्षितार्थसर्वस्वगर्भां वाचं ददात्वित्यर्थः ।

* * * *

इति होराशास्त्रव्याख्यायां दशाध्याय्यां राशिप्रभेदो नाम प्रथमोऽध्यायः ॥

End:

दशमेशस्य प्रीत्यैव निधनेशस्योचितं धनम् ।
लाभाधीशादवाप्नोति वित्तेशात्मको नरः ॥ इति ।

एवं वराहमिहिरहोराशास्त्रे प्रथमाध्यायादारभ्याध्यायदशके मया विदितोऽर्थः प्रायशोऽत्र व्याख्यातः । उपरिगताध्यायार्थाश्च केचित् व्याख्याताः । अत्र पुनः व्याख्यानकौशलाभावात् पूर्वापरपर्यालोचननैपुणाभावादज्ञानाच्च मूलग्रन्थाननुसारः पुनर्वचनमपशब्दप्रयोगाः न्यायविरोधश्चात्र सन्त्येव । तस्मादेतां व्याख्यां यः कश्चित् बुधः पश्यति चेत् क्षन्तुमर्हति नैषा पाण्डित्यप्रकटनाय कृता ॥

स्वैरं मम हृदि तेजो . . . . महाविषाहारम् ।
श्वेतारण्यविहारं श्वेतं शीतांशुशेखरं हारम् ॥

Colophon:

इति होराव्याख्यायां दशाध्याय्यां दशमोऽध्यायः ॥

No. **14065.** भूगोलनिर्णयः.
BHŪGŌLANIRṆAYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 13631.

Wants many leaves in the beginning.

Same work as that described under No. 13465 and with colophon.

No. **14066.** मघावेधादिनिरूपणम्.
MAGHĀVĒDHĀDINIRŪPAṆAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 29*b* of the MS. described under No. 13574.

Incomplete.

Describes certain astronomical conditions which indicate the time of draught and the time when rains can be expected in plenty or in small quantities proportionately, etc.

Beginning:

मघाऋक्षादिचत्वारि चतुर्वेधाः प्रकीर्तिताः ।
पितृब्रह्मादिदेवाश्च राक्षसाः परिकीर्तिताः ॥

पितृभिः दक्षिणे चन्द्रे वृष्टिस्सम्पूर्ण वर्षति ।
अतिदूरमनावृष्टिरत्यासन्ने प्रवर्षति ॥

विन्ध्यब्रह्मादयोर्मध्ये पादमूलं प्रवर्पति ।
ब्रह्मदेवतयोर्मध्ये तदर्धं वृष्टिमाचरेत् ॥

End:

मेषे दशाहे वृषभैकविंशतिः कर्किस्तुलैकादशसिंहषष्ठे ।
कौर्पाष्टमी द्वादशकुम्भनक्रे द्वाविंशतिस्तिष्ठति वास्तुपुरुषः ॥

No. 14067. यवनहोराजातकम्.
YAVANAHÔRÂJÂTAKAM.

Pages, 37. Lines, 4 on a page.

Begins on fol. 31*a* of the MS. described under No. 6470. Complete.

A treatise on horoscopy dealing with the following topics.

Contains the following Adhyayas:—

१. लग्नचिन्ताध्याय.
२. धनचिन्ताध्याय.
३. भ्रातृचिन्ताध्याय.
४. सुखचिन्ताध्याय.
५. पुत्रचिन्ताध्याय.
६. शत्रुचिन्ताध्याय.
७. कलत्रचिन्ताध्याय.
८. मरणचिन्ताध्याय.
९. भाग्यचिन्ताध्याय.
१०. कर्मचिन्ताध्याय.
११. लाभचिन्ताध्याय.
१२. व्ययचिन्ताध्याय.
१३. स्त्रीजातकाध्याय.

Beginning:

लग्नाचिन्त्यं मूर्तिकीर्तिस्थितिश्च ज्ञेयं वित्तं वाक्कुटुम्बश्च विद्याम् ।
धैर्यं वीर्यं भ्रातरं विक्रमेण विद्यां क्षेत्रं वाहनं बान्धवांश्च ॥

* * * *

मूर्तौशरीरसंपद्भवतीत्युक्तानि यानि पुरुषमिह ।
तेषां शुभाशुभमहं वक्ष्ये यवनोपदेशेन ॥
सूर्ये विलग्नसंस्थे, शूररतब्धोऽक्षिरोगसन्तप्तः ।
मेषेऽर्थवान्सतिमिरस्फोटाक्षः चन्द्रभे स्वतन्त्रश्च ॥
सिंहगते रवौशरतोषमिस्वं राजवल्लभत्वश्च ।
कन्यां गते राध्यन्धः तौलिविनष्टान्तजो दरिद्रश्च ॥

* * * *

Colophon:

इति यवनहोरायां लग्नचिन्ताध्यायः प्रथमः ॥

End:

सौम्ये सुखसंप्राप्ते भाग्यसमेतात्पदेतरापापैः (?) ।
मिश्रैस्तु मिश्ररूपा चन्द्रे विपुलान्विता न रूपयुता ॥

Colophon:

इति यवनहोरायां स्त्रीजातकाध्यायः त्रयोदशः ॥

इति यवनहोरा सम्पूर्णा ॥

No. 14068. युद्धकौशलादिविषयः.
YUDDHAKAUŚALĀDIVIṢAYAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 13699.

On the drawing of a circular diagram and finding out therefrom astrologically whether there is likely to be success or defeat, etc., in the battle-field.

Beginning:

वर्तुलं च लिखेचक्रं तिर्यग्रेखास्तथा द्वयम् ।
शूलाकारं चतुष्कोणे त्रीणि त्रीणि क्रमेण च ॥
कृत्तिकादीनि भान्यत्र सव्यमार्गेण विन्यसेत् ॥

* * * *

युद्धकौशलम्—

श्रीदेव्युवाच—

देवदेव परानन्द सर्वज्ञानशिरोमणे ।
तस्मात्त्वं(वाहं)कथयिष्यामि वक्तृरूपेण माधव ॥
देवासुरे घोरयुद्धे जयश्चाथ पराजयम् ।
किंफले न तु वक्तव्यं द्रुतं छत्रपलायनम् ॥

End:

पराशर उवाच—

प्रवेशवीक्षणे चन्द्रे निर्गमे गुरुभार्गवौ ।
अन्योन्यसमयुद्धश्च अर्जुनो हस्तिनापुरि ॥

* * * *

अगस्त्य उवाच—

प्राकारेषु शुभास्सर्वे बाह्ये गर्भे ध्रुवाष्टके ।

उभयोस्समयुद्धचाघातपात्रं पलायनम् ॥

No. 14069. रथचक्रम्.

RATHACAKRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 46 of the MS. described under No. 13606.

Complete.

On the astrologically proper time for placing divine images in cars and on the proper time for drawing the car.

Beginning :

देवोत्सवेषु विधिवद्दिवसेप्वष्ट . . . . ।

. . . . राज्ञां सुखप्रदः ॥

अलङ्काररथारोहगमनाच्छृणु पार्वति ।

अहमुत्सवबिम्बासु वद्धसंस्थापनस्य च ॥

कल्यस्य रूपं संलक्ष्यमानस्यर्क्षोदयस्य च ।

लग्नद्वित्रि . . . . . . ॥

उक्तोदयाश्च शुभदाः यथल्केन्दु वणिग्नयोः(?) ।

ते चोर्ध्वाननऋक्षाश्चेदियद्भिर्मे मनोहरा ॥

द्वादशस्याष्टमस्थानशुद्धयश्चोदयस्य च ।

रथयानेक्षणार्हाणां भोग . . . काः ॥

रथस्याक्रान्त्रिताास्तस्य स्थानारूढाखिला ग्रहाः ।

रथस्य विहिताधारा स्थाणूनां रूपकच्छनिः ॥

वामदक्षिणपार्श्वस्था चक्राणां तु पतीन्द्विनौ ।

नाथौ कुजार्किकीटानां रज्जूनामीश्वरः फणिः ॥

* * * *

रथप्रस्थानकालस्य त्रिषडायरविस्तुमः ।

लग्नस्य विक्रमायस्थो भौमः शुभफलप्रदः ॥

End :

चारो भयध्वजारोहे चारोभयरथोत्सवे ।

चतुरष्टौ ध्वजारोहे पञ्च सप्त रथोत्सवे ॥

लग्नं चतुर्थं . . . . . . वर्जितम् ।
लग्नाष्टमे शुद्धियुते पञ्चमे पापवर्जिते ।
पापांशे पापवर्गे च शुभांशे लग्नमुत्तमम् ॥

Colophon:

रथचक्रं समाप्तम् ॥

No. 14070. रविपादचारवाक्यानि.
RAVIPĀDACĀRAVĀKYĀNI.

Pages, 2. Lines, 8 on a page.

Begins on fol. 21*a* of the MS. described under No. 13631.

Incomplete.

Gives the rule for determining the position of the sun in his passage through each of the 27 constellations.

Beginning:

भरण्यादीनि—
सज्ञोनवस्ते १, सेनाङ्गम् २, बालाश्व ३, यक्षगः ४ ।
कृत्तिका—सारोहरिस्ते १, क्षमेश्रीः २, वरस्ते ३, लोमश्रीः ४ ॥
रोहिणी—नवाङ्कुरोस्ति १, कर्मश्रीः २, नरास्तु ३, धवश्रीः ४ ॥

End:

श्रवणम्—सूर्यस्सुरेशः १, गवयः २, धर्मवान् ३, तपसा ४ ॥
धनिष्ठा—गारं . . १, अज्ञन २, स्थान ३, वी . . ४ ॥
शतभिषक्—स्य.

No. 14071. लग्नघटिकादिनिरूपणम्, आन्ध्रटीकासहिता.
LAGNAGHAṬIKĀDINIRŪPAṆAM WITH TELUGU MEANING.

Pages, 5. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 13661.

States what the duration of time of each of the 12 Lagnas according to the astronomical system prevailing in the Kērala and some other countries.

Beginning:

मीनमेष चतुर्नाड्यः चतुरर्धं वृषकुम्भयोः ।
पञ्चपादे मृगं युग्मं पञ्चार्धं धनुकर्कटौ ॥
सिंहवृश्चिकपञ्चार्धं पञ्चपादे तुलाङ्गना ।
रक्तवर्णौ कुजादित्यौ श्वेतौ भार्गवचन्द्रिरौ ॥

End:

पञ्चत्रयोदशी चाग्नेः षष्ठिर्भूतादिपश्चिमे ।
सप्तमीपूर्णमावल्याममावास्याष्टमीशयोः (?) ॥

No. **14072.** वर्षफणिचक्रम्.
VARṢAPHAṆICAKRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 13700.
Incomplete.
Same work as that described under No. 13490 ante.

No. **14073.** वर्षफणिचक्रादिः.
VARṢAPHAṆICAKRĀDIḤ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 71*a* of the MS. described under No. 13791 ante.
Incomplete.
Similar to the work described under No. 13488.

Beginning:

कृत्तिकादि लिखेच्चक्रमष्टनाडी तु षट्कम् ।
येन विज्ञातमात्रेण क्रियते वर्षनिर्णयः ॥
आदिर्वातदहा नाडिर्मध्यमा जलदाहिनी ।
जलदं मृतनाडी च सप्तनाडी प्रकीर्तिता ॥
कृत्तिका च विशाखा च मैत्राख्यभरणी तथा ।
पूर्वाश्च नश्वरा नाडी चण्डवातभिदायकः ॥

End:

सर्वहानिप्रदो राहुः केतौ चोरभयं भवेत् ।
अपग्रहाश्च लताश्च क्रूरखेचरसंज्ञकाः ॥

ऋजुगत्या व्याधिकराः वक्रगत्या मृतिप्रदाः ।
सौम्यवेधे शुभं तस्य क्रूरवेधे महद्भयम् ॥
मिश्रवेधे मिश्रफलं सदा सौम्यफलो गुरुः ।

No. 14074. संज्ञातन्त्रम्, सव्याख्यानम्.
SAMJÑĀTANTRAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 231. Lines, 9 on a page. Character, Telugu and Grantha. Condition, slightly injured. Appearance, old.

Wants the beginning, but complete

Same work as that described under No. 3050, on pages 1085 and 1086 of Part V of the India Office Library Catalogue: By Nīlakaṇṭha. The commentary is by Viśvanātha, son of Divākara.

Beginning :

अथ द्वादशराशिस्वरूपमाह, तत्रादौ मेषस्य—

(मू.) पुमान् चरोऽग्निस्सुदृढः चतुष्पात् रक्तोष्णपित्तोऽतिरवोऽद्रिरुग्रः ।
पीतो दिनं प्राग्विषमोदयोऽल्पसङ्गप्रजो रूक्षनृपस्समोजः ॥

(व्या.) पुरुषराशिः । चरसंज्ञिकः । अग्निराशिः । दृढाङ्गः । चतुश्चरणः । रक्तवर्णः । उष्णस्वभावः । पित्तस्वभावः । महाशब्दः । पर्वतचरः । क्रूरः । पीत वर्णः । दिवाबलपूर्वदिक्स्वामी । विषमोदयः । अल्पस्त्रीसङ्गः । अल्पप्रजश्च कान्तिरहितः ।

* * * *

एवं मेषसिंहधनुषां वर्णद्वयम् । अथ वृषभस्य—

(मू.) वृषस्स्थिरस्स्त्रीक्षितिशीतरूक्षो याम्ये सुभूवायुनिशाचतुष्पात् ।
श्वेतोऽतिशब्दो विषमोदयश्च मध्यप्रजासङ्गशुभोऽपि वैश्यः ॥

(व्या.) स्थिरसंज्ञिकः । स्त्रीराशिः । भूमिराशिः । शीतस्वभावः । कान्तिरहितः । दक्षिणदिक्स्वामी । सुभूमिचारी ।

End :

पश्चान्वयासावि ततो विपश्चित् श्रीनीलकण्ठःश्रुतिशास्त्रनिष्ठः ।
विद्वच्छिवप्रीतिकरं व्यधात्ता संज्ञा . . . . ॥

ततोऽनन्तदैवज्ञात् पद्माम्बया पद्मनाम्नीयम् अम्बा माता । तयेत्यर्थः । श्रीनीलकण्ठः । श्रीपा . . . . रूपः पुत्रः असावि प्रसूतः । कथम्भूतः विपश्चित्पण्डितः । श्रुतिशास्त्रनिष्ठः वेदशास्त्रसम्पन्नः । स . . . . . व्यधात् । कृतवान् । कथम्भूतं सहमावतंसं सहमं सहमरूपकं श . अवतंसः भूषणं यस्य . . . . रूपकत्वात् पुनः कथम्भूतं विद्वच्छिवप्रीतिकरम् . . . . कृतसंज्ञातन्त्रं सहमाध्यायस्य व्याख्योदाहृतिस्समाप्ता . . . . .

* * * *

लेखितम्.

अथ गणितं वक्ष्यति . तत्रादौ ग्रहाणां चालनं वक्ष्यते—

वर्षप्रवृत्तेः चालनमपेक्षितम् । तच्चालनमत्र ग्रन्थकर्त्रा न लिखितम् । तदत्रोपयोगित्वेन तत्स्वरूपं मया विवृण्व(विय)ते । किंच वर्षेशनिर्णयः । दशान्तर्दशामासप्रवेशदिनप्रवेशादिकमत्रोपयुक्तमप्यत्र न लिखितम् । यत्र यदुपयुक्तं तत्र तत्र तत्तन्मया प्रकाश्यते ।

वर्षफलसाधनार्थं वर्षप्रवृत्तिसमयमाह.

No. 14075. सव्यापसव्यवाक्यनिरूपणम्—आन्ध्रटीकासहितम्.
SAVYĀPASAVYAVĀKYANIRŪPAṆAM WITH TELUGU MEANING.

Pages, 9. Lines, 9 on a page.

Begins on fol. 41a of the MS. described under No. 13609.

Complete.

Deals with the rules for determining the order in which the calculations have to be made in a horoscopic diagram.

Beginning :

मेषादिमीनपर्यन्तं सव्यचक्रमुदाहृतम् ।
वृश्चिकादिचापपर्यन्तमपसव्यमिति स्फुटम् ॥

* * * *

दिवारात्रिविभागेन स्त्रीपुंसः प्रतिकीर्तिताः ।
सव्यापसव्यमार्गेण विन्यसेत्पुरसुन्दरीम् ॥

एवं सूक्ष्मतरं गुह्यं योगिनां भूतवस्थितम् ।
सर्वजीवस्य मरणे वरदेवि न संशयः ॥

End:

वस्त्रलाभं च सम्भोगं क्षेत्रमाप्तिमवाप्नुयात् ।
श्रीलाभं पुत्रसम्पत्तिः जीवप्राणदशाफलम् ॥

* * * *

मीनादिचापपर्यन्तं ౪ రాసులకున్ను అర్ధ త్రిభాగం మధ్యవాక్యం त्रक्षुर्नेघाधासितुमभि అదే వాక్యం మొదలుగాను కడమా ౪ రాసులకు ఉండేది.

No. 14076. स्वल्पजातकम्.
SVALPAJĀTAKAM.

Pages, 25. Lines, 5 on a page.

Begins on fol. 18a of the MS. described under No. 6470.

Complete in 12 Adhyāyas.

Same work as that described under No. 3067 on pages 1094 and 1095 of the India Office Library Catalogue, Part V. It is therein stated that it contains 13 Adhyāyas. The work is attributed to Varāhamihira.

It is also called Laghujātaka or Sūkṣmajātaka.

Beginning:

(यस्यो) दयास्तमययोस्सुरमकुटनिघृष्टकमलचरणोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्रस्स जयति धाम्नां निधिस्सूर्यः ॥
होराशास्त्रं वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि ।
यत्तस्याप्यार्याभिस्सारमहं संप्रवक्ष्यामि ॥
यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः फलदम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव दृष्टेः ॥
शीर्षमुखबाहुहृदयोदराणि कटिबस्तिगुह्यसंज्ञानि ।
ऊरू जानुनि जङ्घे चरणा इति राशयो बोध्याः ॥
अरुणसितहरितपाटलपाण्डुविचित्रास्सितेतरपिशङ्गौ ।
पिङ्गलकर्बुरबभ्रुकमलिना रुचयो यथासङ्ख्यम् ॥

* * * *

Colophon:

इति स्वल्पजातके अध्यायः प्रथमः ॥

End:

षष्ठाष्टमकण्टकगोगुरुरुच्चो भावपा विलग्ने वा ।
शेषैरबलैर्जन्मनि मरणे वा मोक्षगतिमाहुः ॥

Colophon:

इति स्वल्पजातके अध्यायो द्वादशः ॥
वराहमिहिरकृतं स्वल्पजातकं सम्पूर्णम् ॥

GENERAL INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]

[illegible]